पशुकाम इत्यत्र चित्राशब्दस्य वाक्यभेदभयात्कर्मनामधेयत्वं तथाहि न तावदत्र गुणविशिष्टयाग
विधानं संभवति दधिमधुपयोघृतं धाना उदकं तंडुलास्तत्संसृष्टं प्राजापत्यमित्यनेन विहितत्वाद्यागस्य वाक्यभेदं
विशिष्टविधानानुपपत्तेः अप्राप्तस्य यागस्य फलसंबंधे गुणसंबंधे च विधीयमाने वाक्यभेदः अपि चित्राश निरस्यति अत्र पंक्तिं ५=
ब्दात्स्त्रैत्वस्त्रीत्वयोः प्रतिपत्तेः स्त्रीत्वस्य च स्वभावतः प्राणिधर्मत्वात्प्रकृते दध्यादिद्रव्ये कर्मणि व
निवेशायोगात्ते न वाक्येन प्रकृते कर्मणि गुणविधानं किंतु प्राणिद्रव्यैककर्मणां तत्रास्य वाक्यस्याना
रभ्याधीतत्वात् अनारभ्याधीतत्वाच्च प्रकृतौ वा द्विरुक्तत्वादिति न्यायेन प्रकृतिगामित्वात्प्राणिद्रव्यकाणां

अनुवादत्वात् १

देवदत्तनामरूपत्रगनीषोमीयानुवा०१= चित्रयाधैजेतत्य
स्वभावतः५= प्रि३ वा३ नेत्र२=

चयागानां देवदत्तस्यचेतरेष्विति न्यायेनाग्नीषोमीयपशुप्रकृतिकत्वात् तदनुवादेनानेनवाक्येन गुणोविधीयते
देवदत्तस्यचज्योतिष्टोमांगत्वेनस्वतंत्रफलाकांक्षायाअभावात्। पशुकामपदंनफलसमर्पकं। किंत्वग्नीषो
मीयपशुयजनांगत्वयाप्राप्तकामनानुवादः॥ तथाचनवाक्यभेदइतिचेन्न तथा देवदत्तानुदेनचित्रत्व
स्त्रीत्वविधानेवाक्यभेदात् विशिष्टकारकविधानेपिगौरवत्वलदोषोवाक्यभेदएवकारकस्यापि
प्राप्तत्वेनविशिष्टविधानानुपपत्तेः पशुकामपदस्यापिस्वरसतः फलपरस्यकामनानुवादत्वेआनर्थ
क्यापत्तेश्च। नचनियमतः पशुयजनेकामनाभवतिकामनातः प्रागेवकेनचिद्दत्तेपशौतत्भावात्। तथा
चेपशुकामपदस्यानितसवकुवणवाधः देवदत्तस्योत्पत्तिशिष्टपुंस्त्वावरुद्धत्वेन नतत्रस्त्रीत्वविधानानु
पपत्तेश्च॥ आमिक्षायाअनुवादेनवाजिनविधानवत्तु॥ अस्मत्सारंगोग्नीषोमीयइतिविशेषविहिते
आमिक्षायागानुवादेनवाजिनविधानंयथानभवति=

संपादकांगत्वया३=
पशु४=
अग्नीषोमीयपशुयजनकामना५=
६३
कामनायाः३=
आ१ पुंलिंगत्व२

स्वऽग्नीषोमीयस्य ... स्व२४

चित्रयागनिरूपणम् का नः १८

न स्वसन्निधिपठनेनैव चुल्लक्षसारंगवर्णेनावरुद्धे चित्रत्वस्यानावृत्त्याधीतेन सामान्यशास्त्रेण विधानानुपप
१४ त्ते ऽपांचदश्यावरुद्धे सोमद्रव्यविधानमथ माभूत् अग्नीषोमीयपश्वनुवादेन चित्रत्वस्त्रीत्वविधानं
सारस्वती मेषीति वाक्यविहितयागमेष्यनुवादेन तद्गुणविधानं स्यात् अचित्रयेति स्त्रीकारकानुवा
देन चित्रत्वमात्रविधानात्। नच पृषतेन कल्माषसारंगवर्णेन नैराकांक्ष्यान्न चित्रत्वविधानं युक्तमिति वा
च्यं। उपदिष्टेन चित्रत्वेनातिदिष्टस्य वर्णान्तरस्य बाधोपपत्तेरिति चेन्नैवं। नहि चित्रयेत्येकेन पदेन
स्त्रीकारकस्य ... द्रव्यस्य चित्रत्वस्य च विधानं संभवति। एकप्रसरताभंगलक्षणवाक्यभेदापत्तेः उद्दे
श्यविधेयभावस्यानेकपदसाध्यत्वात्। अत एव क्वचित् पूर्वैः प्रथमं ... तत्र विशिष्टं मत्वा विधिः नैव
मत्वानुवादेन प्राप्यस्य विधिरित्युक्तं तृतीये मेष्यनुवादेन चित्रत्वविधाने फलपदानर्थक्यापत्तेश्च उ

सारस्वती मेषीमाल मेत ३८

वाक्यातिदेनयादेवर = । एकार्थतात्पर्यकत्वच मत ३८

तत्सौर्यस्वं प्राजापत्यमित्यत्र संसृष्टद्रव्यक प्रजापतियागेन [illegible] भावयेदिति विहितस्य फलाकांक्षायाः फलविशेषा
चित्रया पशुजातेन [illegible] कांक्षायां इत्यर्थः॥

केन प [illegible]

मयविधाने वाक्यभेदात्। प्रकृतस्य च कर्मणः स्वफलाकांक्षा [illegible] अनिवृत्ते विश्वजिन्न्यायेन फलकल्पने गौर
वं॥ इति मत्वर्थलक्षणया एतस्याधिकारवाक्यप्रतिपन्नैकवाक्यताबाधेन वाक्यभेदप्रसंगा
च्च चित्राशब्दस्य तु कर्मनामधेयत्वे प्रकृतस्य कर्मणः फलाकांक्षस्य फलसंबंधवाक्यकरणान्न वाक्य
भेदः प्रकृतोपादेयैकद्रव्यत्वेन चित्राशब्दस्य तत्रोपपत्तेः। तस्मिन्न वाक्यभेदभयाच्चित्राशब्दस्य
कर्मनामधेयमिति॥ अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रस्य कर्मनामधेयत्वं। तत्प्रख्यशास्त्रात् तस्य
विधित्सितस्य गुणस्य प्रख्यापकस्य शास्त्रस्य विद्यमानत्वेनाग्निहोत्रशब्दः कर्मनामधेयमिति यावत्॥ तथा हि वि
धिनासावप्राप्तविधेयगुणस्य कोपि शास्त्रान्तरेण प्राप्तमप्राप्तं शास्त्रमर्थवदिति न्यायात्। अग्निहोत्रशब्दस्य च
गुणविधित्वे यो गुणस्तेन विधेयः स शास्त्रान्तरेण प्राप्तः [illegible] मिति चेदुच्यते। यदि तावदग्निहोत्रमस्मि

गुणविधित्वे निरस्य तित्त्याहीति ३॥

अतो नामधेयप[...]मिति फलितम् ॥ गुणः १= स्रुवेः १=

१५ क्षिति सप्तमी समासमाश्रित्य होमाधारत्वेनाग्निर्विधेयः [...]ये न तदा यदाहवनीये जुहोतीत्यनेनैव प्राप्त

त्वाद्विधानर्थक्यं । अग्नये होत्रमस्मिन्निति चतुर्थी समासमाश्रित्याग्निरूपा देवतानेन समर्प्यतइति

देवतायाः चेन्न शास्त्रान्तरेण प्राप्तत्वात् । किं तच्छास्त्रान्तरमिति चेद्वक्ष्यते । आपदग्नये प्रजापतये च सायं जुहोती

ति । शास्त्रान्तरेण होमानुवादेनाग्निप्रजापत्योर्विधानान्नाग्निहोत्रपदं देवतासमर्पकं ॥ न चोभय

विधाने वाक्यभेदः परस्परनिरपेक्षविधाने हि वाक्यभेदः स्यात् । अग्नये जुहोतीति प्रजापतये जुहोती

ति प्रत्येकं विधिव्यापारात् । चशब्दश्रवणात्तु परस्परसापेक्षस्यैव पदस्याख्यातान्वयान्न वाक्यभेदः ॥

अत एव अवलिप्ते दाक्षिणां ददातीति वाक्यविहि[...]दक्षिणानुवादेन गौश्चाश्वश्चाश्वतरश्च गर्दभश्चा

जाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति वाक्येन गवादीनां वि

श्री२ १५

पदग्नांश्चेति ३= परस्परानपेक्षविधाने १=

धानेदशमोक्तं संगच्छते ॥ परस्परसापेक्षाग्न्यंगवादीनां विधाने न वाक्यभेदाभावात् ॥ अन्यथाददिलानु
वादेनानेकेषांगवादीनां विधानेनैव संगच्छते ॥ आतश्च जापत्योग्न्यदेवतयोः संतोः समुच्चयो न तु सम
च्चितयोर्देवतात्वं पृथक्कारकविभक्तिश्रवणात् ॥ चकारार्थस्य विभक्त्यर्थेनान्वयात् ॥ तस्याः प्रधानत्वात्
अत एवाग्नीषोमादिवदग्निप्रजापत्योर्देवतात्वमिति ॥ अतोलाचार्या आहुः ॥ अग्नये च प्रजापत
ये च सायं जुहोतीति इति वाक्यं नाग्नेः प्रापकं होमानुवादेन प्रजापतिमात्रविधानात् ॥ नचविति गम
नाविरहादुभयविधाने प्रक्रममिति नान्यं ॥ विधिनाहि तदेव विधीयते यस्य कारान्तरेणाप्राप्तं ॥ तत्र य
थाग्नेन वाक्येन सायंकालेन विधीयते सायं जुहोतीति वचनान्तरेणाप्राप्तत्वात् । तथाग्निरपि नाविधी

व्याहृय ग्या २ चतुर्थ्याः सूत्रेण प्रतिपादनम् ४ =
नैकिं ५ केचिदाहुः नन्चितिर =
प... मंत्रवर्णाद्देवतात्वमवगम्यते इत्यपेः इ =

९६ पते॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति मंत्रवर्णाद्देवतोपप्राप्नत्वात्। मंत्रवर्णस्यापिदेवतात्व सर्पकत्व अग्नेर्मात्र
मस्त्येव॥ अत एवोपांशुयाजे विष्ण्वादीनां मंत्रवर्णिकं देवतात्वमित्युक्तं। नन्वेवं प्रजापतिदेवताया वर्णिकत्वे र =
देवीधः स्यात्। चतुर्थ्यां हि प्रजापतेर्देवतात्वमवगम्यते॥ अग्नेस्तु मांत्रवर्णिकं। तत्र सा सदेवतेति चतु०४ =
देवतात्वेन स्थितस्मरणवत्य आपिदेवतात्वे चतुर्थी स्मरणं नास्ति संप्रदाने चतुर्थीति संप्रदाने तस्याः
स्मरणात्॥ तथापि त्यज्यमानं अग्न्योद्देश्यत्वं तावद्देवतात्वं तच्च संप्रदानस्वरूपानर्गतं सजमानद्रव्यो
द्देश्यत्वे सति प्रतिग्रहीतृत्वस्य संप्रदानत्वात्॥ अत... चतुर्थीतः संप्रदानैकदेशतया देवतात्व प्रतीति
रस्त्येव मंत्रवर्णात्तु न देवतात्वं प्रतीयते... तिलिंगत्वविशिष्टो... मात्रं। अतश्च मंत्रवर्णश्चतुर्थीतो दुर्बलः। प ९६
देवता... श्रेयोऽग्निः १ =

धा॰ २॰ ॥ तद्धितेन चतुर्थ्या वा मंत्रवर्णेन वा[illegible]नः देवता[illegible] विधिस्तत्र दुर्बलत्वं तु परंपरमिति ॥ अतश्च प्र — चतुर्थी १ =
त्ययप्रमाणबोधितप्रजापतिदेवतया दुर्बलप्रमाणबोधिताग्निर्बाध्यः स्यादिति चेत् [illegible] ॥ स्याद्वा — ननु इति चेदि ति समन्वयः २ =
द्योपदिष्टप्रजापतये जुहोतीति केवलं प्रजापतिविधानं स्यात् । विधीयमानस्तु प्रजापतिर्मंत्रवर्णप्राप्त — मंत्रवर्णप्रा
केचिन्मते १ — मग्निमनूद्य तत्समुच्चितो होमोद्देशेन विधीयते ॥ समुच्चितो[illegible]पविधानापेक्षणान्न तु प्राप्तमग्नि — प्त[illegible]
मनूद्य तत्समुच्चितप्रजापतिमात्रविधाने लाघवात् ॥ अतश्च न बाधकत्वं निरपेक्षविधानाभावात् । य
समुच्चयपरि धिमते २ — था च तन्मते अग्निप्रजापत्यौ होमोद्देशेन विधानातुल्यार्थत्वेन विकल्पे प्रसक्ते प्रजापतेर्नैपाद्धिकम
ग्निबाधकत्वं समुच्चयविधानात् ॥ एवं मंत्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतिविधानेऽपि न
एकं

वाक्यद्वयमिति तुल्यं ॥ यत्तु अग्ने मंत्रवर्णिकल्पे अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति मिश्रलिंगमंत्रवर्णोव
लात्सायंहोमस्य द्विदेवत्यत्वापत्तिरिति तन्न। अग्निसमुच्चितप्रजापतिविधानवत्सूर्यसमुच्चितस्यापि वि
धानात्स्यवत्त्वे चतुष्प्रमाणबोधितेन प्रजापतिना मंत्रवर्णप्राप्तस्य सूर्यस्य बाधितत्वात्। यत्त्वग्ने मंत्रवर्णि
कल्पे प्रजापतिविधेरेकेनैव वाक्येन सिद्धेर्यदग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये
च प्रातर्जुहोति इति वाक्यद्वयं व्यर्थमिति। तन्न। भवेद्व्यर्थं यदि प्रजापतिमात्रविधानं विवक्षितं स्यात्
। सायंहोमे अग्निसमुच्चितप्रजापतिविधानं प्रातर्होमे सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति मंत्रवर्णप्राप्त
सूर्यसमुच्चितप्रजापतिविधानं च विवक्षितं॥ न चैतदेकेन वाक्येन सिध्यति॥ अतोर्थवद्वाक्यद्वयं

अग्निर्ज्योतिरित्यादि स्वाहेति सायं जुहोति। सूर्यो ज्योतिरित्यादि स्वाहेति प्रातर्जुहोतीति विधा... मं ३३ ... मंत्रवर्णयोः ... अग्निसूर्यप्रकाश... ... इति श्रुतिः ...

पक्षे गं नेमी अग्निर्वर्णितत्वे मंत्रवर्णस्याग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति। सायं जुहोतीति वाक्येन सायंहोमेवि
निपुक्तत्वात्॥ तस्य काश्यपस्याग्नेरपि प्रजापतिसमुच्चितस्य तत्रैव देवतात्वेव गते पदग्नये चेति वा
क्ये सायंप्रशब्दो व्यर्थ इति॥ एवं यत्सूर्याय चेति वाक्ये प्रातः शब्दोपि व्यर्थ इति। किं च मंत्रवर्णेन
ज्योतिष्ट्वगुणविशिष्टस्याग्नेः प्रकाशनाद्विशिष्टस्यैव देवतात्वापातश्च इति॥ तदपि न हो मं उ
वादेन देवताद्वयविधानेपि मंत्रवर्णयोर्लिंगादेव प्राप्तिसंभवान्न विधानर्थं स्यात्। मिश्रलिंगमंत्राव
विपर्ययेदस्तयोः प्रतिप्रसवार्थविधानेपि तन्निद्विगतयोः सायंप्रातःशब्दयोरानर्थक्यं विधीयमान
यो मंत्रयोर्भवस्य देवप्राप्तिसंभवात्॥ तस्य काश्यपोर्दैवत्ये व्यवस्थितत्वात्॥ अनुवादत्वोक्तिस्तु
उभयं चेत् तुल्यमिति॥ मात्रवर्णिकत्वेपि अग्नेः केवलस्य देवतात्वं॥ न गुणविशिष्टस्य यदग्नये चेति

पक्वाक्यद्वयेन ... स्वादित्यग्नि ... ज्योतिः सूर्यो ... हेति प्रातः ... विधान ... विधानपक्षे ... पि ५=

अग्निः ... मिश्रलिंगात् पदग्नये चेति यत्सूर्याय चेति वाक्यद्वयेन देवताविधानपक्षे सायंप्रातर्... योः अग्निसूर्ययोः पदेवताकत्वाभावेन मिश्रलिंगमंत्रयोर्लिंगात् प्राप्ति
संभवेन अग्निर्ज्योतिर्ज्योतिः सूर्य... वाक्येनैव प्राप्त्या...

उभयत्रेति अग्निश्रलिंगमंत्रविधिगतयोः सायंप्रातःशब्दयोः पदग्नये च प्रजापतये चेति सायं जुहोतीत्यादिविधिगतयोः सायंप्रातः शब्दयोरित्यर्थः निरुक्त पृष्ठेति न पत्रे ॥

१८ वाक्येऽग्नेः एवाहुतिरित्यत्र चैकै[...] केवलस्यैवाग्नेः संकी[...] केवलस्यैव देवतात्वावगतेः यथास्य पांसु
पायो विश्वादेर्मंत्रवर्णिकत्वेपि न गुणविशिष्टस्य देवतात्वं विष्णुरूपां शुपेष्टव्यइत्यर्थवादे केवलस्यैव
संकीर्तनात्तद्वदिति अतश्च मांत्रवर्णिकत्वे दोषाभावाद्देवताद्वयविधाने चागौरवापत्तेरतः प्राप्त
मग्निमनूद्य तत्समुच्चितः प्रजापतिरेवात्र विधीयते॥ होमानुवादेनोभयविधाने वाक्यभेदप्रसं
गाच्च। न च चकारश्रवणान्न वाक्यभेद इति वाच्यं। चकारार्थो हि समुच्चयः। तं च समुच्चयं यदि चकारः
प्राधान्येन ब्रूयात्तदा प्रधानस्यानेकविशेषणासंग्राहकत्वादारुण्यादिविशिष्टक्रयविधानवच्चकारक
द्वयसमुच्चयविधाने वाक्यभेदो न भवेत्। न च चकारः समुच्चयं प्राधान्येन ब्रूते परोपसर्जनत्वेनैवाभि
धानात्। अत एव दशमे भाष्यकारैश्चका[...]समुच्च[...]ण्ड्याद्वैलक्षण्यं प्रतिपादितं समुच्चयशब्दो हि १८

नेप्राधान्येनब्रूतेनचकारः।यदिप्राधान्ये[illegible]नदातं[illegible]तेपनः समुच्चयः क्रियागुणैः संबध्येत।समु
च्चयः शोभनः समुच्चयोद्रष्टव्यइतिवत् शोभनश्चद्रष्टव्यइतिप्रयोगः स्यात्।समुच्चयशब्दवच्चकारस्य
प्राधान्येनसमुच्चयवाचित्वेधवखदिरयोः समुच्चयइतिवत् धवखदिरयोश्चेत्यपिप्रयोगःस्यादिति
चकारः५= अतश्चकारः समुच्चयंनप्राधान्येनब्रूतेयेनप्रधानस्यैकस्यविधानाद्वाक्यभेदोभवेत्।किंतुका
समुच्चयं५= रकद्वयोपसर्जनत्वेनैवसंतंब्रूते।समुच्चितावग्निप्रजापतीइतिप्रधानद्वयविधानेचवाक्य[illegible]: चकारःप्र
वाक्यभेदः= स्यादेव।यथाग्न्येहोद्देशेनसंमार्गैकत्वविधानेयद्यपिचचकारःसमुच्चयंप्राधान्येनब्रूयात्तथापितस्य समुच्चयं
कारकद्वयंप्रतिप्राधान्यमनुपपन्नं।विभक्त्याभिहितस्यकारकद्वयस्यक्रियोपसर्जनत्वेनसमुच्चयो
पसर्जनभावात्।हृदंगादि शब्दैरभिहितंहिकारक[illegible]न्यैनसंबध्यते।कारकसमुच्चयःकर

लो

१९ एसमुच्चय इति। विभक्त्यभिहितं तु क्रिययैव। कारको[illegible]चप्राधान्यात्। अतश्च कारेण उच्यमानः स कारको

विभक्त्यभि
हितसंप्रदान
रूपं ३=

पसर्जनत्वेनैवोच्यते। कारकरूपं च प्राधान्येनैकोद्देशेन च प्रधानरूपविधाने वाक्यभेद एव। यथाहुः। अने
कपदसंबन्धरूपं चैकमपि कारकं। तथापि तदनावृत्तेः प्रत्ययैर्न विधीयत इति। यच्च यथा दक्षिणानुवादेन
गवादीनामनेकेषां विधाने न वाक्यभेदस्तथा कारकरूपविधानेऽपीति। तन्न। नहि गोश्चाश्वश्चेनास्ति
न्वाक्यभेद दक्षिणानुवादेन गवादयो विधीयन्ते उभेरीत्या वाक्यभेदापत्तेः। चकारश्रवणेन कथंचित्तत्परि

वाक्यभे
दस्य

हारेऽपि गवादीनामनेकेषां द्वादशशतसंख्यायाश्च विधाने वाक्यभेद एव। आग्नेयवृष्टिशाखायां गोश्चैवमा
देः तस्य द्वादशशतमित्यंतस्य सहस्रत्वेन वाक्ये [illegible] वाक्यमित्युक्तं दशमे। अतो नैकवाक्येनोभयवि
शिष्टा दक्षिणा विधीयते। विशिष्टविधा[illegible]नैकवाक्य[illegible]दः। अत एव पार्थसारथिमिश्रैर्दर्शितं तत्र तत्र

अतो भेदवाक्येनोभयविशिष्टाद् दक्षिणाविधीयते ० अनुपपत्तेति मित त्वेन च ...

... ६ ३

दक्षिणाः = ३

सो भयविशिष्टा विधीयते ॥ अनेक गवाद्य... लिके कादक्षिणा विधीयते इति चोक्तं । नचैवं आत्विग्भ्यो द
क्षिणां ददातीत्यस्यानर्थक्यं ॥ तस्यानुवादत्वात् । आर्त्विज्यसंबंधपरत्वा क्वाद दक्षिणाशब्दसामर्थ्याद्धि आर्त्वि
जां च भत्साध्वर्यादीनां च तत्संबंधः स्यात् ॥ एतद्धि वाक्यसत्वे च न भवति । आर्त्विक् शब्दस्य ब्रह्मादि गतत्वे
न प्रकृत नप्रक्कर्णा आर्त्विक्त्वाभावस्य न तीयत उक्तत्वात् । अतश्च गो प्रत्यक्षैकायास्मिन्वाक्ये विशिष्ट
विधानान्न वाक्यभेदः । यदग्नये प्रजापतये च सायं जुहोतीति तु न विशिष्टविधानं होमस्याग्निहो
त्रं जुहोतीत्यनेन प्राप्तत्वात् । अतश्च होमानुवादेन समुच्चितोभयविधाने वाक्यभेदा गौरवापत्ते
नोनेन वाक्येन देवताद्वयं विधीयते ॥ किं तु मंत्रवर्ण प्राप्त मग्नि मन्त्र घटितत्समुच्चितः प्रजापतिर्होमो
द्देशेन विधीयते ॥ अतश्च नेदम् मंत्रः प्रापकं किं तु मंत्र... एवं च अतश्च तेनाग्नेः प्राप्तत्वान्नाग्निहोत्र

मंत्रगाः =

...तु एव ... त्वे ... सा... यी एगं

२० पदं देवतासमर्पकं किं न हि नामधेयमेव। तत्सिद्धमेतद्यस[...]त्वादग्निहोत्रशब्दस्य कर्मनामधेयत्व
मिति। एवं प्र[...]याजेषु समिदादिदेवतानां समिधः समिधोऽग्न आज्यस्य व्यंतु इत्यादिमंत्रवर्णेभ्यः प्राप्त
त्वात्। समिधो यजतीत्यादिषु समि[...]दिशब्दस्तत्प्रख्यशास्त्रात्कर्मनामधेयं। यथाहुः। विधित्सित
गुणप्राप्तिशास्त्रमन्यद्यत्र तु विद्यते। तस्मात्स्वार्पणं व्यर्थमिति नामत्वमिष्यते इति दिक्। श्येनेनाभि
चरन् यजेतेत्यत्र श्येनशब्दस्य कर्मनामधेयत्वं तद्व्यपदेशात्। तेन व्यपदेशात् उपमानं तद् यथानु
पपत्तेरिति यावत्। तथाहि। यद्विधेयं तस्य स्तुतिर्भवति। तद्यद्यत्र श्येनो विधेयः स्यात् तदार्थवादे
स्तस्यैव स्तुतिः कार्या। न तु यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्त इत्यनेना
र्थवादेन श्येनः (पक्षी) स्तोतुं शक्यः। श्येनोपमा[...]नार्थान्तरस्तुतेः क्रियमाणत्वात्। न च श्येनो

तस्मा[...]प मान[...] नामधेयत्व नात्

पमानेन स एव स्तोतुं शक्यते॥उपमानेः पक्षे व भावस्य भिन्नत्वेनिष्टत्वात्।पदान्तु रूपेण संज्ञको यागो विधीय

ते तदार्थवादेन रूपेणोपमानेन तस्य स्तुतिः (यागस्य) ।ऐकं तु शक्यत इति रूपेण शब्दस्य तद्व्यपदेशाद्यागनामधेयत्वं

तत्सिद्धं निमित्तचतुष्टयान्नामधेयत्वं॥उत्पत्तिशिष्टगुणबलीयस्त्वमपि पंचमं नामधेयत्वे निमित्त

मिति केचिदाहुः॥वैश्वदेवेन यजेतेत्यत्र वैश्वदेवशब्द . स्य कर्मनामधेयत्वमुत्पत्तिशिष्टगुणबलीय

स्त्वात्।उक्तमत्वर्थलक्षणादिप्रकारचतुष्टयासंभवात् तथा हि।न तावन्मत्वर्थलक्षणभयाद्याग

त्वं वक्तुं युक्तं।वैश्वदेवेनेति तद्धितेनैव मत्वर्थस्य यागस्योक्तत्वात्।सास्य देवतेत्यस्मिन्नर्थे हि तद्धि

तद्धितेन म त्वर्थस्योक्त त्वेः २ तस्मरणं।नत्रास्य शब्दस्य तद्धितान्तर्गतस्य पद्यपि सत्कुहविषोरिति स्मृतेः सत्के हविषि वा मुख्य

त्वमवगतं तथापि सर्वे नाम्नामुपस्थितवाचित्वात् सत्कहविषोश्चात्रानुपस्थितत्वाद्यजेते तु

आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं। सावित्रं द्वादशकपालं सारस्वतं चरुं। पौष्णं चरुं मारुतं सप्तकपालं। वैश्व
देवीमामिक्षां। द्यावापृथिव्यामेककपालं (इति विहितानां ... तेपादयः ... यागाः ३=
वैश्वदेवेन यजेतेति वाक्य ३=
विशेषणाच्च वैश्वदेव्या
मिक्षेत्यस्यैव विधेर्दे

२१ पास्थितं यागमेवास्य शब्दोऽभिधत्त इत्यागमत्वं यत्र ... विश्वदेवरूपैकदेवताविधानाच्च नैवा न प्रापक

वैश्वदेवेन यजेतेत्यस्मा दस्मात् ५= वाक्येन ४= कर्मभेदः। नापि तस्य तच्छास्त्रान्नामधेयत्वं। यत्र हि विधित्सितो गुणोऽन्यतः प्राप्तस्तत्रैव तस्य तच्छास्त्रा त्वात् वैश्वदेवेनेत्य
न्नामत्वं यथाग्निहोत्रशब्दे। अत्र चाग्नेयादयो ह्येते यागाः प्रकृताः तत्रामिक्षायागे यद्यपि विश्वेदेवाः प्रा नामधेयत्वं
प्ता वैश्वदेव्यामिक्षेति तथापि सप्तसु तेषु तेषामप्राप्तत्वाद्वैश्वदेवेन यजेतेत्यनेन तत्र तद्विधानेन त यागेषु

समत ...येन यपावैश्व देव्यामिक्षे त्यत्र ५= विधेयमन्र २= त्प्रख्यशास्त्रमप्राप्तेन तेन तद्वशान्नामत्वं स्यात्। न चामिक्षायागस्यैव तन्नामेति वाच्यं। वैश्वदेवेन
यजेतेति वाक्यवैयर्थ्यापत्तेः। न च वैश्वदेवशब्दस्यामिक्षायागमात्रनामत्वे स एव यागो नैनानूद्यत
इति वाच्यं। न च तदनुवादे नास्ति किंचित्फलं। पूर्वोक्तप्रवणे वैश्वदेवेन यजेतेति विधीयमानस्य
प्राचीनप्रवणदेशस्य विनाप्यनेन वाक्येनामिक्षायागसंबंधोपपत्तेः। विश्वेदेवसंबंधात्तस्य। आ

वैश्वदेवेनेत्यनेनामिक्षायागानुवादेन २= यागा २ आमिक्षायाग ...
वैश्वदेवेन यजेतेति ४=

प्राचीनप्रवणे वैश्वदेवेन यजेतेति वाक्यस्य ५ वैश्वदेवे[illegible]नेत्येनेन ४
वैश्वदेवेनेति वाक्यस्य ४= प्राचीनप्रवण इत्या[illegible] पक्षेतेनाग्नेययागेषु ४=। अर्थवं व इति २
वाक्येन ४=

ग्नेयाद्यशेषप्रकृतयागनामधेयत्वे तु न वैश्वदेवेनेति वाक्यानर्थक्यं तदोत्पन्नेनाग्नेयादियागाः अनू-
द्यन्ते। अनुवादेन चैकप्रतीत्यारूढत्वात्समुदितानामाग्नेयादीनामपि वैश्वदेवशब्दो नामधेयं सिध्यति
एवं च प्राचीनप्रवणे वैश्वदेवेन यजेतेत्यत्र वैश्वदेवशब्देनाग्नेयादियागाननूद्य प्राचीनप्रवणविधानं
तत्र सिद्धं भवति। यदा कर्मसत्त्वे अनेन वाक्येनाग्नेयादियागस्यैव प्राचीनप्रवणदेशसंबंधः स्यात्। अत
श्चातुर्मास्यप्रयोगेषु प्राचीनप्रवणदेशसंबंध एवैतद्वाक्यप्रयोजनं। एवं च वैश्वदेवशब्दोग्नेयादीनां नामधे-
यं न च तत्र तत्प्रख्यशास्त्रं निमित्तं संभवति। सत्त्वस्तु वैश्वदेवा[illegible] प्राप्तेः। अतो न वैश्वदेवशब्दस्य त
त्प्रख्यशास्त्रान्नामधेयत्वमिति। नापि तद्व्यपदेशात्। तादृशव्यपदेशस्यानुपपत्तेर्भावात्। अतश्च
वैश्वदेवशब्दस्य नामधेयत्वे उक्तप्रकारचतुष्टयस्यानिमित्तत्वादुत्पत्तिशिष्टगुणवत्तीयत्वमेव ति

नामधेयत्वे सिद्धिश्च ४=
वैश्वदेवेने ति वाक्यस्य ४=

कर्मान्तरेऽष्टहविष्ट्वासंभवात् ३ = कर्मणां

२२ मितं। तथाहि वैश्वदेवेन यजेतेत्यत्र न तावदप्रकृतकर्मानुवादेन देवताविधानं संभवति तेषाम
उक्ताष्टयागान्यत् विधानम् २ = त्रानुपस्थितेः। नापि देवताविशिष्टकर्मान्तरविधानं संभवति गौरवापत्तेः। अष्टौ हवींषीति अन
न्यगतिकलिङ्गविरोधात्। अतोनेन वाक्येन प्रकृतकर्मानुवादेन देवता विधीयत इति वक्तव्यं। त
त्रामिक्षायागे विश्वदेवप्राप्तेः सप्तसु यागेषु अनेन वाक्येन विश्वेदेवाः विधीयंत इति वक्तव्यं। न
चैतत्संभवति तेषां तेषामुत्पत्तिशिष्टाग्न्याद्यवरोधात्। आकांक्षायाहि संबंधो भवति आग्नेयादि
यागानां हि देवताकांक्षा उत्पत्तिशिष्टैरग्न्यादिभिरेव निवृत्तेति न तत्र विश्वेदेवविधानं युक्तं। अ
तश्चोत्पत्तिशिष्टगुणबलीयस्त्वाद्वैश्वदेवशब्दस्य कर्मनामधेयत्वमिति। यथाहुः। गुणांतरावरू
द्धत्वान्नावकाशो गुणोपरः। विकल्पोपि न वैषम्यात्तस्मान्नामैव युज्यते इति॥ अन्ये त्वाचार्याहुः॥ २२

यदग्नये च प्रजापतये चेति विधिः ३= बाधितः १=

यः शब्दो यत्र कर्मणा यागेन संबंधं बोधयति स चेत्तत्संबंधः शास्त्रांतरप्राप्तिर्न स्यात्तदा तस्य शब्दस्य तत्

कर्मेरः= नामधेयत्वं तस्य शास्त्रत्वात् । न च शास्त्रांतरं विधिर्वा अर्थवादो वेति अत्र नादरः । तत्राग्निहोत्रशब्दे

न संबंधबोधकं शास्त्रांतरं विधिरेव वैश्वदेवशब्दस्य विश्वेदेवसंबंधं कर्मणो बोधयति । विश्वदेव

संबंधश्चाष्टसु यागेषु विश्वेदेवाः समपद्यंत तेन वैश्वदेवस्य वैश्वदेवत्वमित्यर्थवादादवगतः ॥ न च वि

धिरेव तत्र शास्त्रं नार्थवाद इत्यत्र किंचित्प्रमाणमस्ति ॥ अत एव ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र

ज्योतिष्टोमशब्दस्त्रीणि वा एतानि ज्योतींषि एतस्य स्तोमा इत्यर्थवादावगतं ज्योतिःसंबंधं निमित्तीकृत्य

सोमयागे प्रवर्त्तमानस्तस्य शास्त्रान्तो मध्ये यं भवति । एवं प्रकृतेपि द्रष्टव्यं पंचमप्रकारकल्पने प्रमाणा

भावात् । अत एव वैश्वदेवाधिकरणे वार्त्तिककारैरेवमुपसंहृतं तत्त्वं तयैव सर्वेषां नामधेयत्वमिति । पञ्चो

वैश्वदेव्यामिक्षेत्यस्यायमे वैश्वदेवपदगौण्यामिक्षारूपद्रव्यविधायकत्वात् ६=

२२ त्यत्र शिष्टगुणवत्वोपस्व मुक्तं तद्गुणविध्यसंभवे पुरुषस्य स्वपमात्रं। तत्सिद्धं तदभ्यासात्वैश्वदेवशब्द
स्य कर्मनामधेयत्वमिति। ननु पशुसोमाधिकरणे ऐन्द्रवायवं गृह्णातीत्यादौ न यजिकल्पनं सोमेन यजेते
ति प्रत्यक्षे यजिश्रुतेरस्तु तत्। इह तु न्यायेन वैश्वदेव्यामिक्षेत्यत्रापि यजिकल्पनं मास्तु। वैश्वदेवेन यजेते
वैश्वदेवेन यजेतेति पा केन ४= त्यत्र प्रत्यक्षयजिश्रुतेः एवं चानेन वाक्येन देवताविशिष्टकर्मविधानमस्तु तस्य च द्रव्याकांक्षायां वैश्व
देव्यामिक्षेति द्रव्यविधानमस्तु। एवं च नवाक्यद्वयस्याप्यनुवादत्वं। नाप्यैन्द्रं हविरिति वन्न्यगतिकलिंग
विरोधो भवेदिति चेत्। मैवं वैश्वदेव्यामिक्षेत्यत्र यज्युपकल्पने आमिक्षा किमनुवादेन विधीयत इति
वक्तव्यं। विश्वेदेवानुवादेन विधाने द्रव्यस्य देवतांगत्वमेव स्यान्न यागांगत्वं। किं च वैश्वदेवीशब्दो देवतात दे २
द्धितत्वात्। आमिक्षां तत्वेन श्रुतेरस्तु तत्। तत्र विश्वेदेवानुवादेन द्रव्यविधानं वैश्वदेवीशब्दे नैव कर्तव्यं पद २३

विश्वेदेवा देवताकत्वेन १= प्रकृतं प्रधानानुवादेन १= वैश्वदेवीशब्दात् तद्धितप्रत्ययांशेन १=

एकार्थीतात्पर्यीकत्वम् २= प१ एवपदेनोक्तो भयकरणं १=

श्रुतेः॥ यथा भावनायां करणसमर्पणं धातुनैवाक्षिप्यते पदश्रुतेरेवं तु पदेनेत्युक्तं भावार्थाधिकरणे तद्वत्। तत्रैव
वषट्कर्तुः प्रथमभक्ष इति वत् एकप्रसरताविरोधः। अतो यागानुवादेनापि द्रव्यविधानार्थं वैश्वदेव्यामि वैषम्यं दर्श
क्षेत्यत्र यजिकल्पनं तावदवश्यं कर्त्तव्यं। ततश्च पशुसोमाधिकरणन्यायवैषम्यात् ऐन्द्रं नायं व गृह्णाति सद्व यति ऐन्द्रेति २
देवताविशिष्टग्रहणविधाने न यज्यकल्पनात्। यजिकल्पने च वैश्वदेव्यामिक्षेत्यत्रैव द्रव्यदेवताविशि
आग्नेयादिषु यजिकल्पनात् ३= ष्टकर्मविधानमुक्तं रूपद्रूपश्रवणाच्च। एवं चाग्नेयोष्टाकपालः सौम्यं चरुरित्यादिवाक्यैर्वैश्वदेव्यामिक्षेत्य देवताविशि
स्य वाक्यस्य प्रायः पाठोऽरक्षितो भवति। अन्यथा हि तेषु सर्वेषु द्रव्यदेवतासंबंधे कल्पितयागविधानं अत्रैव ष्टामिक्षाया ग्रमात्रसम
द्रव्यमात्रविधानमिति वैरूप्यं प्रसज्येत। किंच वैश्वदेवेन यजेतेत्यत्र वैश्वदेवशब्दस्य देवतासमर्पकत्वे र्पकत्वे २=
यदि विश्वेदेवाः समप्यंते तदा वैश्वदेवस्य वैश्वदेवत्वमिष्यते तत्स्यार्थवादसंल्पतमेव निरालंबनत्वं स्यात्। एत

वैश्वदेव्यामिक्षेत्यत्र यज्यकल्पने ३=

अष्टहविःसंघरूपकर्मणि १= तद्ध्यानम् १=

२५ दर्थवादाद्धि वैश्वदेवशब्दो विश्वदेवकर्तृके कर्मणि प्रवृत्त इति ज्ञायते। तद्देवतासमर्पकत्वे विरुध्यते॥
किंच वैश्वदेवेन यजेतेत्यस्य यागविधित्वे आमिक्षायागो सन्निशिष्टत्वात् तथा च तया न वाजिनं बाधि
तुं शक्यत इत्युभयोरपि आमिक्षावाजिनयोरेकस्यागांगत्वं स्यात्। तथा च विकल्पः सचाष्टदोषदुष्ट इति
तस्मा वैश्वदेव्यामिक्षेत्यत्रैव यागविधानं। इतरस्य त्वनुवादत्वं। अनुवादत्वे च यथा नानर्थकं तथोक्त
मित्यास्तां तावत्। तत्सिद्धं वैश्वदेवेन यजेतेत्यस्य शब्दस्य कर्मनामधेयत्वं। तदेवं निरूपितं मत्वर्थलक्ष
णादि प्रकार[illegible]रचतुष्टनिरूपणेन नामधेयस्य विधेयार्थपरिच्छेदकतयार्थवत्वं॥
दामोदरो जयति श्रीः। अनर्थहेतुकर्मणः सकाशात्पुरुषस्य निरतिकरत्वेन निषेधानां पुरुषार्थानुबं
धित्वं॥ तथाहि यथा॥ विजयः प्रेरणामभिदधतः स्वप्रवर्तनैकत्वनिर्वाहार्थं विधेयस्य धियादेः श्रेयःसा २४

यागस्य

धनत्वमाक्षिप्यतः पुरुषं तत्र प्रवर्तयति । एवं न कलंजं भक्षयेदित्यादयो निषेधा अपि निवर्तनामभिद
धतः स्वनिवर्तकत्वनिर्वाहार्थं निषेध्यस्य कलंजभक्षणादेरनर्थहेतुत्वमाक्षिप्यतः पुरुषं ततो निव
र्तयंति । ननु कथं निषेधानां निवर्तनाप्रतिपादकत्वं यावता न भक्षयेन्नहं तत्परस्यैव मादौ अमवधा
नेन नञर्थस्याभावस्य धात्वर्थेनान्वये । धात्वर्थवर्जनकर्त्तव्यतैव सर्वत्र वाक्यार्थः प्रतीयते ॥ ततश्च
यथा यजेतेत्यादौ यागकर्त्तव्यता वाक्यार्थः । एवं निषेधेषु तत्तद्धात्वर्थवर्जनकर्त्तव्यता वाक्यार्थो न निव
र्तनेति चेत् । [illegible] । असमवधानेपि धात्वर्थस्य प्रत्ययार्थोपसर्जनत्वेनोपस्थितस्य नञर्थेनान्वयायोगा
त् । नह्युपसर्जनमन्येनान्वेति राजपुरुषमानयेत्यत्र [illegible] राज्ञ आनयनेनान्वयापत्तेः । तत समवधानेपि
नञर्थस्य न धात्वर्थेनान्वयः । आख्यातस्यैवेहापि प्रत्ययेनापि कलंजादिपदार्थैरन्वयः । तेषामपि कार

भिन्नपदस्य नञर्थेना (नि

२५ कोपसर्जनत्वेनोपस्थितत्वेन [illegible] न्वयायोगात्। एकहायन्याइवाह एयेन अतश्चात्वेना
न्वयायोगान्नञर्थः प्रत्ययार्थेन संबध्यते। तस्य प्राधान्यात्। अथ भावनयेवाह एषा हीति तत्रापि नामत्वेनांशवा
च्यत्यार्थं भावनयात्स्या अपि लिङ्त्वांशवाच्यप्रवर्तनोपसर्जनत्वेनोपस्थितत्वात्। अतो लिङ्त्वांशेन
नञ् संबध्यते तस्य सर्वापेक्षया प्राधान्यात्। नञश्चैष स्वभावो यत्स्वसंबंधिप्रतिपक्षबोधकत्वं। नास्तीत्यत्र प्रवर्त्ते
स्त्यस्तीति सत्त्वशब्देन संबध्यमानो नञ् सत्त्वप्रतिपक्षं असत्त्वं गमयति। तदिह लिङर्थस्तावत्प्रवर्तना अ नाप्रती
नत्तेन संबध्यमानो नञ् प्रवर्तनाप्रतिपक्षं निवर्तनां गमयति। विधिवाक्यश्रवणे लिङ् अयं मां प्रवर्त्तयतीति ति ३ २५
वन्निषेधवाक्यश्रवणे अयं मां निवर्त्तयतीति निवृत्त्यनुकूलव्यापाररूपनिवर्तनाख्यः प्रतीतिरनुभवसिद्धा
अतश्च सर्वत्र निषेधे श्रुतिवर्तनैव वाक्यार्थः। एवं च विधिनिषेधयोर्भिन्नार्थत्वं सिद्धं भवति॥ हनना

३३

दिवर्जनं कर्त्तव्यतावाक्यार्थपक्षे तु कर्त्तव्यताया एवोभयत्र प्रतिपाद्यत्वात्तयोरेकार्थत्वं स्यात् ॥ तन्न युक्तं । यथा
हुः । अनंतरं याहृशं लोके ब्रह्महत्याश्वमेधयोः । दृश्यते ताहृगेवेदं विधानप्रतिषेधयोरिति तथा । फल
बुद्धिप्रमेयाधिकारी बोधकभेदतः । पंचधा संततमिच्छन्त्यात्रेदो विधिनिषेधयोरिति यन्मते दुष्टसाधनत्वं
लिङर्थस्तन्मते लिङः संसृष्टानञा दुष्टसाधनत्वप्रतिपादनमनिष्टसाधनत्वं गमयति सर्वथापि तु नञः प्रा
प्रत्ययस्य ५= धान्यात्क्वचिदपि नान्वयः । यदा तु तदन्वये किंचिद्बाधकं तदा गत्याभावत्वर्थे नान्वयः ॥ तत्र बाधकं द्विविधं
स्नातकस्य ६= तस्य व्रतमित्युपक्रमो विकल्पप्रसक्तिश्च । अनेन च बाधकद्वयेन नञ्युक्ते प्रकृते शुचिवाक्ये पर्युदास
कर्त्तव्यमूह= आश्रयणं भवति । तदभावे निषेध एव । पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥ प्रतिषेधः स विज्ञेयो क्रि
यया सह यत्र नञ् इति च तयोर्लक्षणं तत्र नेक्षेतोद्यंतमादित्यमित्यादौ पर्युदासाश्रयणं तस्य व्रतमि
नास्तं यंतं कदाचनेति आदित्यमित्युत्तरश्लोकः १=

व्यापीनां वक्ता १ ... नात् अर्थान्तरोक्तौ च स्यात्
तस्य व्रतमि त्यस्य२

स्तुपक्रमात् । तथाहि । व्रतशब्देन कर्मणोऽर्थ उच्यते॥ अतस्तस्मात् कस्य कर्मत्वेनोपक्रमो लिंगे तत्कर्तव्याम
त्यपेक्षायामग्नेर्देवेनोक्तेन मादित्यमित्यादौ कर्मण एवार्थी वक्तव्यः आकांक्षितामिधां । एवं वाक्यस्य साकां
क्षत्वेन प्रामाण्यं संगतात्॥ ... न हि कर्मव्यापारे केव्यत्वेनोपक्रमे ग्रे च तदनभिधाने प्रसंगो न
नि एवं वाक्यस्य साकांक्षत्वे ... भवति॥ न च साकांक्षस्य प्रामाण्यं । गौरश्वः पुरुषो हस्तीत्यादावपि प्रसंगात्। किं
चैवं तेन तत्पयोपक्रमेण प्रतीयमाना एकवाक्यता च न स्यात् अर्थान्तरोक्तेः। अतश्चास्मिन् वाक्ये कस्य न कर्मण
एवार्थी वक्तव्यः॥ तदुक्तौ च न नञः प्रत्ययेन संबंधो घटते। तत्संबंधे कर्तव्यार्थोक्तेरनुपपत्तेः॥ प्रत्ययार्था
वतारितो नञ् धातुना संबध्यते। तत्संबंधेन नञः प्रतिषेधकत्वं विधायकसंबंधे नैव तस्य प्रतिषेध्य...क
त्वात् प्रतिषेधकत्वस्य विधायकत्वप्रतिपन्नत्वात्। नाम्नधातुयोगे तु न नञः प्रतिषेधकत्वं तयोरविधा

...त्वात् २

बुधा इति शेषः ९=

पकत्वात्।यत्वाहुः।नामधात्वर्थयोगी तु नैव नञ्‌प्रतिषेधकः।वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनाविति
अतश्च नेदंतेत्यत्र नञो धातुयोगाभावान्नेहितिभ्यां ईक्षणविरोधीकश्चनार्थः प्रतिपाद्यते।ननु तदन्यतद्विरु
द्धतदभावेषु नञ इति सत्यपि स्मरणे नञः स्वसंसृष्टाभाव एव शक्तिः बाधकाभावात् ननु तदन्यतद्विरुद्ध पोतेपो
र भावघटितत्वेन गौरवात्।अनेकार्थत्वस्यान्याय्यत्वात्।अतो नञो धातुयोगे धात्वर्थाभावबोधकत्व
मेव।ननु तद्विरुद्धार्थबोधकत्वमिति चेत्।सत्यं।नञोऽभाव एव शक्तिः स्मरणं तु प्रतीत्यभिप्रायं।।नाम न शातत्र भिप्रायं ५
धात्वर्थयोगेऽपि प्रतीत्यभिप्रायं।।तथापि नेदंतेत्यत्र प्रत्ययस्य नञा संबंधात् तेन तावत्काश्चिदर्थो वि
धेयः तत्र न तावद्धात्वर्थो विधातुं शक्यते नञा तदभावबोधनात्।नापि तदभावो विधातुं शक्यते।अभाव
स्याविधेयत्वात्।अतश्च नाजहितिभ्यां विधानयोग्यः कश्च नेक्षणविरोधी अर्थो लक्षणया प्रतिपाद्यते।।स

लिङ्गाविधानयोग्यः ९=

वस्त्रेणानुरवपिधानादेः १८

२१ चेक्षणविरोधीलक्षणाः पदार्थो नेक्षेतेत्यत्र वीक्षणसंकल्पः । तस्येक्षणविरोधित्वात् । सत्यपि पदार्थांतरस्ये
क्षणविरोधित्वे सर्वक्रियाविनाभूतत्वेन संकल्पस्यैव लक्षणा । स एव नेक्षेतेत्यत्र कर्तव्यतया विधीयते । अ
नीक्षणसंकल्पेन भावयेदिति भाव्याकांक्षायां च एतावता हैनसा वियुक्तो भवतीति वाक्यशेषावगतः पाप
क्षयो भाव्यत्वया संबध्यते । एवं चात्र पापक्षयार्थसंकल्पस्य कर्तव्यतया विधानात् तस्य व्रतमित्यनेनैकवाक्य
तासिद्धा भवति । तस्मिंश्च नेक्षेतेत्यत्र तस्य व्रतमित्युपक्रमात् पर्युदासाश्रयणमिति ॥ ननु याजेषु येयजाम
हं करोतीत्यत्र विकल्पप्रसक्त्या तदाश्रयणं तथाहि । यद्यत्र प्रधानसंबंधत्वेनाभावः प्रसज्यसंबंधः स्वीक्रि
यते ॥ तथा सत्यनेनवाक्येनानुयाजेषु येयजामहः प्रतिषिध्यतेरितिवक्तव्यं ॥ अनुयाजेषु येयजामहं न
कुर्यादिति । न चात्र तस्य प्रतिषेधः प्राप्तिं विना संभवति । प्राप्तिसापेक्षत्वात् प्रतिषेधस्य अत एव नांतरि २१

निवर्त्तितव्यं। प्राप्ति १ २ वैराग्याद्य १ प्रवर्त्तते २ संध्योपासनादिवत् १८ =
मा२

द्वेषादिवीत्यस्य न प्रतिषेधत्वं अंतरिक्षेचयनाप्राप्तेः॥ अत एव न ब्राह्मणो हंतव्य इत्यस्य निषेधत्वेन नि
वर्तकत्वमुपपद्यते॥ सर्वो हि पुरुषः कदाचिद्धननादौ प्रवर्त्तते कदाचिद्रागाद्यभावेन निवर्त्तते। तत्र यदि नि
षेधस्य प्राप्तिसापेक्षत्वं न स्यात्॥ तदा रागाविरोधाय हननादावप्रवृत्तं प्रत्येव शास्त्रप्रामाण्योपपत्तौ रागा
दिना हननादौ प्रवृत्ते न पुंसानततौ सापेक्षत्वे तु स्वयमप्रवृत्तं प्रति पुंसत्वाभावेन निषेधशास्त्राप्रवृत्तेः
रागादिना प्रवृत्तं प्रत्येवसंभावितनिमित्तरागाबाधेन निषेधशास्त्रप्रवृत्तेर्युक्ता प्रवृत्तस्य ततो निवृत्तिः अत
श्च ब्राह्मणो न हंतव्य इत्यस्य निषेधस्य निवृत्तिनियमबोधकत्वं व्रीहीनवहन्यादित्यस्येवावघात
नियमबोधकत्वं॥ यथा खलु व्रीहीनवहन्यादिति शास्त्रं वैतुष्यार्थं अवघाते स्वयं प्रवर्तं पुरुषं प्रति
न प्रवर्त्तते वैयर्थ्यात्। किंतु दलनादौ प्रवृत्तं प्रति। एवं न हन्यादिति शास्त्रं हननात्स्वयं निवृत्तं पुरुषं

२८ षं प्रति न प्रवर्त्तते वैयर्थ्यात्। किं तु ह नने प्रवृत्तं पुरुषं प्रति। कर्त्तव्यत्वेन प्रसक्तस्य प्रतिषेधात्। यत्कर्त्तव्यंत
न्नेति अतश्च प्राप्तिसापेक्षत्वात्प्रतिषेधानां अनुयाजेषु येयजामह प्रतिषेधे तस्य तत्र प्राप्तिर्वक्तव्या सा न
तावद्वचनमादाविवरागतः संभवति। अतो यजतिषु येयजामहं करोतीति शास्त्रात्सा वक्तव्या शास्त्रप्राप्त
स्य च प्रतिषेधे विकल्पः स्यात्॥ शास्त्रे रागप्राप्तिनिमित्तरागस्येव शास्त्रांतरस्यापि तत्र बाधायोगात्। न च
पदशास्त्रेणाहवनीयशास्त्रस्येव नानुयाजेष्विति विशेषशास्त्रेण यजतिषु येयजामहं करोतीति सामा
न्यशास्त्रस्य बाधः स्यादिति वाच्यं॥ शास्त्रयोर्हि तत्र बाध्यबाधकभावो यत्र परस्परं निरपेक्षता। न हि प २ षट ३
दशास्त्रस्य स्वार्थविधानार्थमाहवनीयशास्त्रापेक्षास्ति निषेधशास्त्रस्य तु प्रसक्त्यर्थं यजतिषु येयजामहंक
रोतीति विधेरस्त्यपेक्षा। एवं च निषेधशास्त्रस्य विशेषविषयत्वेन प्राबल्यवद्विधिशास्त्रस्यापि उपजीव्य

द्विरदृष्टकल्पनां दर्शयति विधेहीति ३=

त्वेन प्राबल्यमस्तीति न निषेधेन विधेरत्यन्तबाधो युक्त इति विहितप्रतिषिद्धत्वाद्विकल्पः स्यात्। सचैव न युक्तः
विकल्पे हि पक्षे शास्त्रस्याप्रामाण्यं भवति। न ह्यनुयाजेषु येयजामहं करोति नानुयाजेष्विति वाक्ययोः प्रामाण्यं सं
भवति व्रीह्यनुष्ठानसमये यववाक्यवच्छास्त्रस्यादृष्टकल्पना च स्यात्। विधेर्हि एवं ज्ञायते यत् अनुयाजेषु
येयजामहकरणे कश्चनोपकारो भवतीति निषेधात्त्वेतदकरणादिति ज्ञायते अनन्तवदनाकरणादिवत्
दर्शपूर्णमासयोः कश्चिदुपकारः क्रियत इति॥ सचोपकारोऽदृष्टरूप इति द्विरदृष्टकल्पनाप्रसंगः। अतश्च
विकल्पो न युक्तः। प्रतिषेधाश्रयणे च तदा पर्युदासाश्रयणं। किन्तु नञः अनुयाजशब्देन सम्बन्धमाश्रि
त्य पर्युदास आश्रीयते। नञनुयाजशब्दाभ्यामनुयाजव्यतिरिक्तलक्षणात्। अनुयाजव्यतिरिक्तेषु येय
जामहं करोतीति। अत्र च वाक्ये येयजामहः कर्तव्यतया न विधीयते। यजतिषु येयजामहं करोतीत्यनेनै

नानुयाजेषु १=

२९ वविहितत्वात्। किं तु सामान्यशास्त्रविहितयेयजामहानुवादेन तस्यानुयाजव्यतिरिक्तविषयतां विधी
यते। यत्यजतिषु येयजामहं करोतीति तदनुयाजव्यतिरिक्तेष्विति। एवं सामान्यशास्त्रस्याविशेषाद्येविहितः
नानुयाजेष्विति यनेनानुयाजव्यतिरिक्तविषयसमर्पणाद्‌नुयाजव्यतिरिक्तेषु येयजामहः कर्तव्यतया प्राप्तः येयर
अनुयाजेषु तु सकर्तव्यतया प्राप्त्यभावान्न निषेधप्राप्तिरिति न विकल्पः। तन्मतेन यथा वा नानुयाजव्यतिरिक्तवि
षयसमर्पणेन नानुयाजेष्विति वाक्यस्य नाप्रामाण्यं। अतश्च पर्युदासाश्रयणे न किंचिद्बाधकं
नन्विदं नानुयाजेष्विति वाक्ये विकल्पभयात्पर्युदासाश्रयणमिति। ननु पर्युदासाश्रयणे यजतिषु ये
यजामहं करोतीति शास्त्रेण यागसामान्ये प्राप्तस्य येयजामहस्य नानुयाजेष्विति यनेनानुयाजव्यतिरि
क्तेसंकोचनात्पर्युदासस्योपसंहारादभेदः स्यादिति उपसंहारो हि सामान्यप्राप्तस्य विशेषे संकोचो भव

कर्मेदं दृष्टान्तेनाह उपेति १८

न्येनु ३ न २

अनुयाज २८

तियथा पुरोडाशं चतुर्धा करोतीति पुरोडाशसामान्ये प्राप्तं चतुर्द्धा करणं। आग्नेयं चतुर्द्धा करोतीति
आग्नेनसंकोच्यत इति चेत् (आग्नेय) तन्मात्रसंकोचार्थत्वादुपसंहारस्य तदन्यमात्रसंकोचार्थत्वात्पर्युदास इ
तिके चित्॥ अ उपसंहारो नाम सामान्यतः प्राप्तस्य विशेषेसंकोचनरूपो व्यापारविशेषो विधेः प पर्युदास
र्युदासः सविशेषोपक्रोतरपदेन नञ्‌ इरलमिपुको नञ्‌ प्रत्ययातिरिक्तेन धातुनाकानाम्ना वा नञः संबं स्तु ३४
धः पर्युदासः अतः अनयोस्तावत्स्वरूपतः स्पष्ट एव भेदः एवंसत्यभेदः आशंक्येत पदिपत्र पर्युदासस्त
त्रावश्यमुपसंहारः स्यात् न चैतदस्ति नेदतो घंतमिस्यादौ सत्यपि तस्मिन्नुपसंहाराभावात्॥ नहि तत्रा ग्ने:
यैव चतुर्धाकरणमिव सामान्ये प्राप्तं किंचिद्विशेषे संकोच्यते॥ पापक्षयोद्देशेनानीदेन संकल्पमात्रविधा
नात्। प्रकृतोदाहरणे तु याजसामान्ये प्राप्तस्यैव यजामहस्यानुयाजव्यतिरिक्तेषु संकोचनात् (नं) यदि विधेरूप

एतावत्कथनेन उपसंहारविधिश्च नियमेनानायाति १= आग्नेयमात्रसंकोचे यत्रपर्युदासस्तत्रैवेत्युपमनुपसंहारन इ
अतोऽस्ति विधिः २= तिनास्तीत्यर्थः नेवं तत्पादावुपसंहारा-
भावात् १=

३० संहारविधित्वं भवति नैतावता किंचिद्विरुध्यते॥ विध्यभावे हि कथं विधिकार्यमुपसंहारः पर्युदासे
नक्रियत इति भवति विरोधः। न चात्र विधिर्नास्ति नञोऽनुयाजपदसंबंधेन विधेर्विधायकत्वस्याव्या
घातात्। अत्र हि पर्युदासोऽनुयाजव्यतिरिक्तविषयसमर्पकः। आग्नेयपदवत् उपसंहारकस्तु विधिरे
व। न चात्र तस्मात्रसंकोचाभावान्नोपसंहार इति वाच्यं॥ तस्मात्रसंकोचरतिकोऽर्थः॥ आग्नेयमात्रे
संकोचो नोत्वास्य [illegible] मात्रसंकोचो वा आद्ये अनारभ्याधीतसाप्तदश्यस्य मित्रविं
दादिप्रकरणस्थेन वाक्येनोपसंहारो न स्यात्। आग्नेये संकोचाभावात् द्वितीये चतु प्रकरणस्य मित्र
विंदादिप्रकरणस्थवाक्ये [illegible] मात्रे प्राप्तस्याग्नेये संकोचभवत् अनुयाजाननुयाजेषु साधारण्येन प्रा
प्तस्यानुयाजेषु संकोचादुपसंहारः स्यादेव। एतावांस्तु विशेषः। आग्नेयादिवाक्येषु आग्नेयपादयोवि ३०

अनुयाजव्यतिरिक्तरूपस्य विशेषस्य १=
विकल्पः ४=

शेषाः स्वपदोपस्थापिताः। प्रकृते तु पर्युदासे नञ्समुपस्थापितातिरिक्तोपसंहारन्यायस्त्वविशिष्ट एव। यत्त्वेतद
न्यमात्रसंकोचनार्थत्वात्पर्युदासस्येति तन्न॥ नेत्येतेनात्र सत्यपि पर्युदासे संकोचाभावात्। न ह्यत्र
सामान्ये प्राप्ते तदन्यमात्रे संकोच्यते। संकल्पमात्रविधानादिषु केभिस्तास्तां तावत्। नास्ति स्वं नानुपा । पर्युदासः ५=
जेष्वित्यत्र विकल्पप्रसक्त्या पर्युदासाश्रयणमिति। यत्र तु अत्राश्रयितुं न शक्यते तत्र नञ्त्वसक्तावपि
निषेध एवाश्रीयते। यथा नातिरात्रे षोडशिनं गृह्णातीत्यत्र ह्यतिरात्रे षोडशिग्रहणं प्रतिषिध्यत इति अशक्यत्व माहयदीति ३
विहितप्रतिषिद्धत्वात् विकल्पप्रसक्तावपि पर्युदासो नाश्रयितुं शक्यत्वात्। यदि ह्यत्र नञः षोडशि
पदेन संबन्धः स्वीक्रियेत तदा अतिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वाक्यार्थः स्यात्। तत्र चातिरात्रे षो
डशिनं गृह्णातीति प्रसक्तविधिविरोधः अतएवातिरात्रपदेन नञः संबन्धोऽतिरात्रे षोडशिनं गृह्णा

वक्ष्यमाणादेव १= सोमपात्रविशेषं २= अतिरात्रव्यतिरिक्ते यागे षोडशिनं गृह्णाती
[illegible] पदेन नञ्सम्बन्धे वाक्यार्थः स्यात् तत्र वक्ष्यमाणात् तेन सम्भवती
तिभावः १=

३१ तीति प्रत्यक्षविधिविरोधात् ॥ अतश्चात्र यत्र पर्युदासस्यानुपपत्तेर्निषेध एव स्वीक्रियते विकल्पोपि
स्वीक्रियते अनन्यगतित्वात् अतश्चैतत्सिद्धं यत्र नञ्युक्तमित्याद्युपक्रमः विकल्पप्रसक्तिश्च नास्ति । तत्र प्र
तिषेधो यथा न कलंजं भक्षयेदिति यत्र वा विकल्पप्रसक्तावपि पर्युदासाश्रयणं नोपपद्यते तत्रापि
प्रतिषेधः यथा नातिरात्रे षोडशिनं गृह्णातीति । एतावांस्तु विशेषः । यत्र विकल्पापादकः प्रतिषेधः
तत्र प्रतिषिध्यमानस्यानर्थहेतुत्वं उभयोरपि विधिनिषेधयोः क्रत्वर्थत्वात् । यत्र तु न विकल्पः प्र
सज्यते । प्राप्तिश्च रागतः प्रतिषेधश्च पुरुषार्थस्तत्र निषिध्यमानस्यानर्थहेतुत्वं यथा कलंजभक्षण
स्य दीक्षितो न ददाति न जुहोतीत्यादि तु नुदानहोमादीनां शास्त्रप्राप्तावपि पुरुषार्थत्वेन प्राप्तत्वात् क्रत्व
र्थत्वेन प्रतिषेधो [illegible] तीत्यादि तु नुदानहोमादीनां शास्त्रप्राप्तावपि पुरुषार्थत्वेन प्राप्तत्वात् क्रत्व ३१

पुरुषोपकारित्वेन २=

र्थत्वेन प्रतिषेधेऽनुत्पाद्यत्वाभावेन विकल्पाप्रसक्तावपि न तेषामनर्थहेतुत्वं रागतः प्राप्त्यभावात्। रा
गतः प्राप्तस्यापि क्रत्वर्थत्वेन प्रतिषेधे तदनुष्ठाने क्रतौ वैगुण्ये नानर्थहेतुत्वापत्तिः। यथा स्त्र्युपग
मनादिप्रतिषेधे रागतः प्राप्तस्य पुरुषार्थत्वेन प्रतिषेधे निषिध्यमानस्यानर्थहेतुत्वमिति दिक्। तस्मि
द्धं निषेधानां पुरुषार्थानुबंधित्वं। एवं सर्वस्यापि वेदस्य पुरुषार्थानुबंधित्वं। नंद नंद नो जयति। प्रकृतमनु अध्ययनवि धि उपात्त चिन ५=
सरामः। तदेवं यथा विध्यादीनामध्ययनविध्युपात्तानां नानर्थक्यं एवमर्थवादानामपि तदुपात्तत्वेनानर्थ
क्यं एवमर्थवादानामपि तदुपात्तत्वे नानर्थक्यानुपपत्तेः स्वार्थप्रतिपादने च प्रयोजनाभावात्तल्लक्षणया
प्रयोजनवदर्थपर्यवसानं वक्तव्यं। ते चार्थवादाः द्विविधाः। विधिशेषाः निषेधशेषाश्च। तत्र वायव्यं श्वे च २
तमालभेत इत्यादिविधिशेषाणां वायुर्वै क्षेपिष्ठा देवता इत्यादीनामर्थवादानां विधेयार्थस्तावकतयार्थवत्वं,

वेद्यामास्तृतबर्हिषि हिरण्यं निधाय तस्याभिमंत्रणं तस्य २ कृत्वा ब्राह्मणेभ्यो देयम् तत्र रजतं न देयम् इति भावः १=
स्वर्थवादानां स्वार्थप्रतिपादने प्रयोजनाभावाच्च १=

३२ बर्हिषि रजतं न देयमित्यादि निषेधशेषाणां सोरोदीदित्यादीनामर्थवादानां तु निषेधानिंदकतयेति। अ
तश्च लोके लक्षणया प्राशस्त्यमप्राशस्त्यं च स्वसन्निधिपठितविधिनिषेधापेक्षितत्वात् स्वार्थप्रतिपादने प्रयो
जनमत्वमभावेनार्थवादैर्बोध्यते॥ तच्च प्राशस्त्यज्ञानं शब्दभावनायामितिकर्तव्यतात्वेन संबध्यते। पर
मप्रकृतमनुसरामः। तस्मिंश्च वेदप्रमाणार्थभावनाभाव्यकोपेक्षितलिङादिज्ञानकरणिकाप्राशस्त्यज्ञानेति
कर्तव्यताका शाब्दीभावना लिङ्ग्लोशेनोच्यत इति॥ ननु केयं शाब्दीभावना। उच्यते पुरुषप्रवृत्त्यनुकूलो
व्यापारविशेषः स एव विध्यर्थः। लिङादिश्रवणे अयं मां प्रवर्तयतीति तस्य नियमेन प्रतीतेः एवं च इष्टसा
धनत्वं विध्यर्थ इति तन्न। तथा सति इष्टसाधनमिति शब्दस्य विधिशब्दपर्यायः स्यात्। न च पर्यायत्वमुच्यते
।संध्योपासनं ते इष्टसाधनं तस्मात्त्वं कुर्विति सहप्रयोगात् पर्यायाणां च सहप्रयोगाभावात्। अतश्च मा

पारविशेषएवविध्यर्थः ॥ सचलोके पुरुषनिष्ठोभिप्रायविशेषः। वेदे तु पुरुषाभावाद्वेदनिष्ठएवप्रेरणापरप
र्यायपरस्तुकं ॥ ननुलोके शब्दनिष्ठप्रेरणापरपर्यायव्यापारे शब्दप्रयोगाभावेनशक्तिग्रहाभावात्कथंत
शाब्दबोधः ३ स्यविधिशब्दार्थत्वमितिचेत्न सम्यगेतत् ॥ तथापिबालस्तावत्स्तनपानादौस्वकृतरोदनादिजनितमा
तृप्रवृत्तेः स्वाभिप्रायरूपप्रवर्तनाज्ञानजन्यत्वावधारणात्सविधिकप्रयोजकवाक्यश्रवणसमनंतरमा
विर्भूतप्रयोज्यवृद्धप्रवृत्तिमुपलभ्यतत्कारणत्वेनतस्यप्रवर्तनाज्ञानमनुमिमीते यद्यपि भोजनादौस्वप्र
वृत्तेः समीहितसाधनताज्ञानपूर्वकत्वात्प्रयोज्यवृद्धप्रवृत्तेरपितत्पूर्वकत्वावसानं युक्तं तथाप्यनुपस्थि
रितप्रवृत्तौ प्रवर्तनाज्ञानजन्यत्वस्योक्तमांनप्रवृत्तौदर्शनेन प्रयोज्यवृद्धप्रवृत्तेरपि अनभिप्रेरितप्रवृत्तित्वाव
त्तत्कारणत्वेन प्रवर्तनाज्ञानस्यैवाध्यवसानं। तच्च प्रवर्तनाज्ञानमन्वयव्यतिरेकाभ्यां प्रयोजकवाक्यज

न्यत्वा

३२ ऽभिसवधारयति। तत्र चावापोद्वापाभ्यां प्रवर्त्तनायां विधिशक्तिमवधारयति। प्रवर्त्तनानुकूलो व्यापारः
प्रवर्त्तना स च व्यापारः प्रेषादिरूपो विविध इति प्रत्येकं व्यभिचारित्वाद्विधिशब्दवाच्यत्वानुपपत्तेः
प्रवर्त्तनासामान्यमेव विधिशब्दवाच्यमिति कल्पयति। एवं च विधिश्रवणे प्रेषादिरूपस्यैवाऽभि
प्रायस्य प्रवर्त्तनात्वेनैव रूपेण प्रतीतिर्न विशेषरूपेण तस्यैव शक्तिग्रहात् विशेषरूपेण तु प्रतीति
र्लक्षणयैव॥ एवं च वैदिकलिङादिश्रवणेपि प्रवर्त्तनासामान्यमेव प्रतीयते तत्र कोसौ व्यापार इत्यपे
क्षायां प्रेषादिरूपस्यैवाऽभिप्रायस्यापौरुषेये वेदेऽनुपपत्तेः शब्दनिष्ठ एव प्रेरणापरपर्यायः कश्चिद्व्या
पार इति कल्प्यते। अतश्च शब्दनिष्ठ एव प्रेरणापरपर्यायो व्यापारः शाब्दी भावना सैव च प्रवर्त्तनात्वेन
रूपेण विध्यर्थ इति। अयमेव वार्थोऽभिधाभावनामाहुरन्यामेव लिङादय इति वार्तिकस्य। अभि

वेदस्य प्रवृत्तिजनकत्वान्यथाऽनुपपत्त्याकल्पित ६=

धीयतेनेनेति मुख्यत्वाभिधाशब्देन शब्द उच्यते। तथ्यारात्मिको भावना हि तु इत्यादि वाच्येति केचिदाचार्याः
अप्रेत्याहुः सत्यं प्रवर्त्तना सामान्यं विध्यर्थः तथैव शक्तिग्रहात्। परस्यानुकूलव्यापारः प्रवर्त्तना अपौ
रुषेये च वेदे प्रेषादेरसंभवात् किंचित्सुरूप परस्यानुकूलो व्यापारविशेषः कल्पनीयः। विधिशब्दाभिधेय
प्रवर्त्तनासामान्यस्य विशेषमंतरेण पर्यवसानात्। तत्र कोसौ व्यापाररूपेक्षायां धात्वर्थगतं समीहित
साधनत्वमेवेति कल्प्यते। तस्यापि स्वपरस्यानुकूलत्वात्। सर्वो हि समीहितसाधनतां ज्ञात्वा प्रवर्त्तते। अ
न्यप्रेरितोपि यदा इष्टसाधनतां न जानाति तदा नैव प्रवर्त्तते। स्वतंत्रप्रेरणावादेपि तदा इष्टसमीहित
साधनताज्ञानं स्वीक्रियत एवान्यथा विधेः प्रवर्त्तकत्वानुपपत्तेः। अतश्चानन्यपरत्वात् समीहितसाधन
तैव प्रवर्त्तनात्वेन रूपेण विध्यर्थः। एवं च विधिशब्दस्यान्यनिष्ठव्यापारबोधकत्वं लोकप्रसिद्धं सिद्धं भवति

वेदकप्रेरणा स्थलेपि

पा॰ आदि १= समीहितसाधनत्वम् २= संगच्छते १=

मीमांसकमते शब्दस्य द्रव्यत्वात् स्पन्दना स२ स्वस्मिन् विधिशब्दे पतत्प्रवृत्तिहेतुत्वं तेनानुमितस्य ८=
वत्वम् १= यागादि २= प्रवर्त्तना प्रवर्त्तनाचेन समीहित

३५ किंच शब्दे एको व्यापारः स्पंदाद्यतिरिक्तः कल्पनीयः तस्य च स्वप्रवृत्तौ पराधीनप्रवृत्तौ वा कारणत्वेन क्लृप्तस्य च साधनत्वा
इष्ट-साधनत्व २
वर्त्तनात्वेन रूपेण ज्ञातस्य प्रवृत्त्यनुकूलत्वं शब्दस्य च परनिष्ठव्यापारज्ञापकत्वेन क्लृप्तस्य स्वनिष्ठव्यापार भिधाने
बोधकत्वं । विधेश्च प्रवर्त्तकत्वनिर्वाहार्थं यत्व थे स्वस्य समीहितसाधनत्वमिति कल्पना द्वरं आवश्य नप=
कस्यैवसमीहितसाधनत्वस्य स्वप्रवृत्तिहेतुत्वेन क्लृप्तस्य प्रवर्त्तनारूपेण विध्यर्थत्व कल्पनं लाघवात्
यागादि
अन्यनिष्ठत्वाच्च । न च विधेः प्रवर्त्तकत्वनिर्वाहार्थं समीहितसाधनत्वकल्पनापि यो के [redacted] पि वि नै० म०५=
माचार धेः प्रवर्त्तकत्वं तथा तथ्स्य समीहितसाधनत्वकल्पकमेव नास्तीति वाच्यं प्रवर्त्तनाभिधानेन एतन्मते त्वे रणान५
पि विधेः प्रवर्त्तकत्वात् । विध्यभिहितस्य च प्रवर्त्तनाख्यसामान्यस्य विशेषमन्तरेणापर्यवसानात् समीहितसा
धनत्वस्यैकत्वात् । नन्विष्टसाधनत्वस्याविध्यर्थत्वे संध्योपासनं तेरिष्टसाधनतत्वं कुर्वित सह प्रयोगानुपपत्तिरि

प १ आचार

ति वार्थं । इष्टसाधनत्वस्य विशेषरूपेण विधिनानभिधानात् । प्रवर्त्तनात्वेनरूपेणाभिधानात् । सामान्यश
ब्दस्य च विशेषशब्देन दृष्टः सह प्रयोगः पांचालराजा द्रुपद इत्यादौ । तस्मात्समीहितसाधनतैव प्रवर्त्तनात्वे
नरूपेण विध्यर्थः सैव चैतेन रूपेण शब्देनाभिधीयत इति शाब्दी भावना ॥ उक्तं वार्त्तिकस्याप्ययमेवाभि
प्रायः अभिधीयते साभिधा समीहितसाधनता सैव प्रवर्त्तनात्वेनाभिहिता पुरुषप्रवृत्तिं भावयतीति
भावनां तां लिङादय आहुरिति । यथाहुः पुंसामिष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्त्तकः । प्रवृत्तिहेतुधर्मं च प्रवदंति
प्रवर्त्तनामिति तस्मिंश्च यजेतेत्यत्र लिङंशेन शाब्दीभावनोच्यत इति । आख्यातांशेन चार्थीभावनोच्य
ते । ननु केयमार्थी भावना । कर्त्तृव्यापार इति चेत् । न यागादेरपि तद्व्यापारत्वेन भावनात्वापत्तेः । न चेष्टापत्तिः
तस्य प्रकृत्यर्थत्वेन प्रत्ययार्थत्वाभावादिति चेत् ॥ अत्राहुः । सत्यं न यागो भावना किंतु स्वर्गं ह्याजनितो याग

य न

३५ विषयोपः प्रयत्नः साभावना। स एव चाख्यातांशेनोच्यते। यजेतेत्याख्यातश्रवणे यागेन यतेतेति प्रतीते
कारोत्यर्थ जीयमानत्वात्। यश्च प्रयत्न एवं कं गमनादि करोति तस्मिन्देवदत्तो गमनं करोतीति प्रयोगदर्शनात्। वातादि
वाचकाच नास्पंदमाने तु नायं करोति किंतु वातादिना स्पंदो जायत इति प्रयोगात्करोतेः स्पंदस्थानत्वप्रयत्नः करोति
रूपम् ४= सामानाधिकरण्यं चाख्याते दृश्यते। यजेत यागेन कुर्यात्पचति पाकं करोति गच्छति गमनं करोति अत
श्च करोति सामानाधिकरण्यादप्यत्यस्याख्यातवाच्यत्वं न च रथो गच्छतीति प्रयोगानुपपत्तिः रथे प्रयत्ना
भावादिति वाच्यं। लोकेश्वर्यत्नं प्रयत्नं रथे चारोप्य प्रयोगोपपत्तेः। यन्मतेप्यन्योत्पादनानुकूलं व्यापारसा फल ३=
मान्यं भावना तन्मतेपि रथे गमनातिरिक्तव्यापारानुपलब्धेः रथो गच्छतीति प्रयोगस्योपचारिकत्वमेवे
ति॥ अतश्च प्रयत्न एवार्थी भावना। यदाहुः प्रयत्नमूर्तिरन्यार्थीभावनानुनशक्यते। वस्तुमात्राख्यातवा
रप्येकिप्रैवनतादनुकूलः कृत्यादिरूपो व्यापारोस्तीति भावः २=

स्येह प्रक्रान्ते तु परस्मैपद इति॥ अन्ये त्वाहुः। भवितुर्भवनानुकूलो भावकव्यापारस्तावद्भावना यस्मिन्व्यापा
रे कृते करणं फलोत्पादनाय समर्थं भवति तादृशव्यापार इति यावत्। स एव चाख्यातार्थः कुठारेणाछिनत्तीत्या
ख्यातश्रवणेहि भवत्येतादृशी मतिः॥ कुठारेण तथाव्यापारिते यस्मि न्व्यापारे कृते कुठाराच्छेदनं भवती
ति। एवं यजेत स्वर्गकाम इत्यस्याप्यर्थः। यागेन तथा व्यापारिते यस्मिन्व्यापारे कृते यागात्स्वर्गो भवतीति
स च व्यापारः क्वचिदुद्यमनपतनादिः। क्वचिद्वाग्न्यन्वाधानादि ब्राह्मणतर्पणान्तः। कथं भावाकांक्षायां विशे
षरूपेण पश्चादवगम्यते। अन्ये तूत्पादानुकूलत्वेन सामान्यतस्त्वाख्यातादेवावगम्यते। रथो ग्रामं गच्छ
तीत्यत्राख्यातेन ग्रामप्राप्त्यनुकूलो व्यापार एव प्रतीयते। स्यन्दस्तथा गमनेन व्यापारिते यस्मिन्व्यापारे
कृते गमनाद्ग्रामप्राप्तिर्भवतीति प्रतीतेः॥ न त्वत्र गमनमात्रमाख्यातार्थः॥ तस्य धातुनोक्तत्वात्॥ त

३६ त्रकोसौ व्यापारइत्यपेक्षायां पूर्वोत्तरावान्तरदेशविभजनसंयोजनरूप इति पश्चादवगम्यते ॥ पूर्वेण प्रदेशे
नविप्रयुज्योत्तरेण संप्रयुज्य रथो ग्रामं गच्छतीति प्रयोगात् । उद्यम्य निपात्य कुठारेण छिनत्तीतिवत् । एवं देवद
त्तः प्रपतति इत्यत्रापि देवदत्तस्तथा व्याप्रियते यथा प्रपतनो भवतीति प्रपतनानुकूलो व्यापार एवाख्यातार्थो
न प्रपतनः तस्य धात्वर्थत्वात् । व्यापारविशेषापेक्षायां चरणादिः पश्चादवगम्यते उद्यमननिपत
ना।५ नवत् । तथा च सर्वत्रानुगतत्वादधोऽवसादानुकूलं व्यापारसामान्यमेवाख्यातार्थः । ननु प्रपतनमात्रं र
थो गच्छति देवदत्तः प्रपतति इत्यादिषु तदभावात् । न चात्रौपचारिकत्वं वक्तुं युक्तं मुख्ये संभवति तस्या
न्याय्यत्वात् ॥ कर्मस्थोऽवसादानुकूलो व्यापार एव न प्रपतनमात्रं कर्तृश्चेतनाचेतनकर्तृकत्वात्तत्सा
मानाधिकरण्यादिति । तस्मिन्कर्मण्यवसादानुकूलो व्यापार आश्रयीभावना । इति सैव व्यपदिश्यते सांख्या

तांशे नोच्यते भावयेदिति। तस्माच्छ्वभाव्याकांक्षायां स्वर्गादि भाव्यत्वेन संबध्यते। करणाकांक्षायां यागादिः
करणत्वेन संबध्यते। प्रयाजादय इतिकर्तव्यतात्वेन ॥ एवं च यजेतेत्यादिना स्वर्गोद्देशेन यागादेर्विधा-
नात्सिद्धं यागादेर्धर्मत्वं। प्रयोजनमुद्दिश्य वेदेन विहितत्वादिति॥ सोऽयं धर्मो यदुद्देशेन विहितस्तदुद्दे-
शेन क्रियमाणस्तद्धेतुः श्रीगोविंदार्पणबुद्ध्या क्रियमाणस्तु निःश्रेयसहेतुः। न च तदर्पणबुद्ध्यानुष्ठाने
हो प्रमाणाभावः। यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति
त स्मृतेः॥ अस्याश्चाष्टकादिस्मृतिवत् प्रामाण्योपपादनस्यान्यत्र विस्तरः। क्वाहं मंदमतिः क्वेयं प्रक्रिया महदस-
म्मता तस्मादुक्तो विलासोऽयं गोविंदगुरुपादयोः॥ ग्रंथरूपो मदीयोऽयं वाङ्मयापारः सुशोभनः। अनेन प्रीय-
तां देवो गोविंदो भक्तवत्सलः॥ इति श्री अनंतदेवसूनुना आपदेवेन कृते मीमांसान्यायप्रकाशसंज्ञके मीमां-

३२ ता प्रकरणं समाप्तम् ॥ मिति माघ बदी १४ संवत् १८५५ श्री राधागोविंददेवो जयतो ॥ ० ॥ ० ॥

॥ श्री हरये नमः ॥ श्री नमः श्री गोपीनाथाय ॥ श्री मदनमोहनदेवाय नमः

[illegible]